॥ अथशिक्षारंभः॥श्रीगुरुचरणाभ्यांनमः॥श्री॥ ॥

श्रीगणेशायनमः॥ हरिः ॐ॥ अथशिक्षांप्रवक्ष्यामिपाणिनीयंमतंयथा॥ शास्त्रानुपूर्वतद्विद्याद्यथोक्तं
लोकवेदयोः॥१॥ प्रसिद्धमपिशब्दार्थमविज्ञातमबुधिभिः॥ पुनर्व्युत्पादयिष्यामिवाचउच्चारणवि
धिं॥२॥ त्रिषष्टिश्चतुःषष्टिर्वावर्णाःशंभुमतेमताः॥ प्राकृतंसंस्कृतंचापिस्वयंप्रोक्तास्वयंभुवा॥
॥३॥ स्वराविंशतिरेकश्चसप्तीनांपंचविंशतिः॥ यादयश्चस्मृतास्त्वष्टौचत्वारश्चयमाःस्मृताः॥४॥
अनुस्वारोविसर्गश्चजिह्वामूलीयएवच॥ उपध्मानीयश्चपरःश्रितोदुःस्पृष्टइतिविज्ञेयोलृकारःप्लुतएवच॥५॥१॥
आत्माबुध्यासमेत्यार्थान्मनोयुंक्तेविवक्षया॥ मनःकायाग्निमाहंतिसप्रेरयतिमारुतं॥६॥मारु
तस्तूरसिचरन्मंद्रंजनयतिस्वरं॥ प्रातःसवनयोर्गंतंछंदोगायत्रमाश्रितं॥७॥ कंठेमाध्यंदि
नयुगंमध्यमंत्रेषुभानुगं॥ तारंतार्तीयसवनंशीर्षण्यंजागतानुगं॥८॥ सादीर्णोमूर्ध्न्यभिह
तोवक्त्रमापद्यमारुतः॥ वर्णोजनयतेतेषांविभागःपंचधास्मृतः॥९॥ स्वरतःकालतःस्थाना

द्यत्नानुप्रदानतः॥ इतिवर्णमिदमाङ्निपुणंतंनिबोधत॥१०॥२॥ उदात्तश्चानुदात्तश्चस्वरितश्च
स्वरास्त्रयः॥ ह्रस्वोदीर्घप्लुतइतिकालतोनियमाअमी॥११॥ उदात्तेनिषादगांधारावनु
दात्तऋषभदेवतौ॥ स्वरितःप्रभवात्येतषड्जमध्यमपंचमाः॥१२॥ अशेषस्यतुवर्णानामुरःकंठः
शिरस्तथा॥ जिह्वामूलंचदंताश्चनासिकौष्ठौचतालुच॥१३॥ ओभावश्चविसर्जनीयश्चशषसारफ
एवच॥ जिह्वामूलमुपध्मानंगतिरष्टविधोभवेत्॥१४॥ यद्योभावप्रसंधानमुकारादिपरंपदं॥ स
रोनंतादृशंविद्याद्यदन्यद्व्यंजनंभवेत्॥१५॥३॥ हकारंपंचमेयुक्तमंतस्थाभिश्चसंयुतं॥ ओरस्य
तंविजानीयात्कंठ्यमाहुरसंयुतं॥१६॥ कंठ्यावहाविचुयशास्तालव्याओष्ठजावुपू॥ मूर्धन्यांऋ
टुरषादंत्यालृतुरसास्मृताः॥१७॥ जिह्वामूलेतुकुःप्रोक्तोदंत्यौतवस्मृतौबुधैः॥ एरेतुकंठतालव्या
ओओकंठ्यौतथौष्ठजौस्मृतौ॥१८॥ अर्धमात्रातुकंठ्यास्यादेकारैकारयोर्भवेत्॥ ओकारौकार

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

योर्मात्रातयोर्विवृतसंवृतं॥१६॥संवृतंमात्रकंज्ञेयंविवृतंतुद्विमात्रकं॥घोषावासंवृताःसर्वेऽ
घोषाविवृताःस्मृताः॥२०॥स्वराणामूष्मणांचैवविवृतंकरणंस्मृतं॥तेभ्योपिविवृतोवर्णोताभ्या
मेचौतथैवच॥२१॥अनुस्वारयमाणंचनासिकास्थानमुच्यते॥अयोगवाहाविज्ञेयाआश्रयस्था
नभागिनः॥२२॥अलाबुवीणानिर्घोषोदंत्यमूल्यस्वराननु॥अनुस्वारस्तुकर्तव्योनित्यंह्रस्वःरा
षसेषुच॥२३॥अनुस्वारेविवृत्यंतुविरामेचाक्षरद्वये॥द्विरोष्ठ्योतुविगृह्यीयाद्यत्रोकारवकार
योः॥२४॥व्याघ्रीयथाहरेत्पुत्रांन्दंष्ट्राभ्यांनचपीडयेत्॥भीतापतनभेदाभ्यांतद्वद्वर्णान्प्रयो
जयेत्॥२५॥५॥यथासोराष्ट्रिकानारीतक्रँइत्यपिभाषते॥एवंरंगाःप्रयोक्तव्याःरेवअरोँ
इवरेवदया॥२६॥रंगवर्णेप्रयुंजीरंनोग्रसेत्सर्वमक्षरं॥दीर्घस्वरंप्रयुंजीयात्सम्यङ्नासिक्य २
माचरेत्॥२७॥हृदयेचैकमात्रस्तुर्धमात्रस्तुमूर्धनि॥नासिकायांतथार्धंचरंगस्यैवंहिमा

त्रता॥२८॥हृदयादुरसेतिष्ठन्कांस्येनसमनुस्वरन्॥मार्दवंचहिमात्रंचजघन्यांइतिनिदर्शनं॥२९॥
मध्येतुकंपयेत्कंपमुभौपार्श्वौसमौभवेत्॥सरंगंकंपयेत्कंपंरथीवेतिनिदर्शनं॥३०॥॥एवंव
र्णाःप्रयोक्तव्यानाव्यक्तानचपीडिताः॥सम्यग्वर्णप्रयोगेणब्रह्मलोकेमहीयते॥३१॥गीतीशी ६
घ्रीशिरःकंपीतथालिखितपाठकः॥अनर्थज्ञोल्पकंठश्चषडेतेपाठकाधमाः॥३२॥माधुर्यमक्ष
रव्यक्तिःपदच्छेदस्तुसुस्वरः॥धैर्यंलयसमर्थंचषडेतेपाठकागुणाः॥३३॥शंकितंभी
तमुद्घुष्टमत्यक्तमनुनासिकं॥काकस्वरंशिरसिगतंतथास्थानविवर्जितं॥३४॥उपांशुदष्ट
मनिष्टंनिरस्तंविलंबितंगद्गदितंप्रगीतं॥निष्पीडितंयस्तपदाक्षरंचवर्णप्रदीप्तंननुसानु
नास्यं॥३५॥॥प्रातःपठेन्नित्यमुदस्थितेनस्वरेप्रशस्तेकृतोपमेन॥मध्यंदिनेकंठ
गतेनचैवचक्राह्वसंकूजितसंनिभेन॥३६॥तारंतुविद्यात्सवनत्रयेयंशिरोगतंतच्च

सदाप्रयोज्यं॥मयूरहंसोन्यभृतस्वराणांतुल्येननादेनसमस्थितेन॥३७॥अचोस्पृष्टाय
णस्त्वीषनेमिस्पृष्टारस्मृता॥शेषास्पृष्टाहलःप्रोक्तानिबोधानुप्रदानृतः॥३८॥यमो
नुनासिकानहोनादिनोहझषस्मृतः॥ईषंभादायणंजश्वश्वासिनस्तुखफादयः॥३९॥
ईषच्छासाश्चरोविद्याद्घोषीमेतत्प्रचक्षते॥दाक्षीपुत्रःपाणिनायेनेदंव्याप्तंभुवि॥
॥४०॥॥छंदःपादोतुवेदस्यहस्तौकल्पोथपठ्यते॥ज्योतिषामयनंचक्षुर्निरुक्तं
श्रोत्रमुच्यते॥शिक्षाघ्राणंतुवेदस्यमुखंव्याकरणंस्मृतं॥तस्मात्सांगमधीत्यैवब्रह्म
लोकेमहीयते॥४२॥उदात्तमाख्यातिहस्वोंगुलीनांप्रदेशिनीमूलनिविष्टमूर्धा॥उपांतम
ध्येस्वरितंधृतंचकनिष्ठिकायामनुदात्तमेव॥४३॥उदात्तंप्रदेशिनीविद्यात्प्रचयंमध्य
तोंगुलेः॥निहतंतुकनिष्ठिक्यांस्वरतोपकनिष्ठिकां॥४४॥अंतोदात्तमाद्युदात्तमुदात्त

मनुदात्तंनीचस्वरितं॥मध्योदात्तंस्वरितंद्युदात्तंद्युदात्तमितिनवपदक्रम्या॥४५॥अग्निःसोमः
प्रवोवीर्यंहविषांस्वरेहस्पतीरिंद्रारेहस्पती॥अग्निरित्यंतोदात्तंसोमइत्याद्युदात्तंप्रेत्यदात्तंव
इत्यनुदात्तंवीर्यंनीचस्वरितं॥४६॥हविषांमध्योदात्तंस्वरितंस्वरितं॥रेहस्पतिरितिद्युदात्त
मिंद्रारेहस्पतीइतिद्युदात्तं॥४७॥अनुदात्तोहदिज्ञेयोमूर्ध्युदात्तउदाहृतः॥स्वरितःक
र्णमूलीयःसर्वासेप्रचयस्मृतः॥४८॥चापस्फुवदंतेमात्रांहिमात्रंत्वेववायसः॥शिखीरो
तित्रिमात्रंतुनकुलस्त्वर्धमात्रकं॥४९॥कृतीर्थादागतंदग्धमपवर्णंचभक्षितं॥नतस्य
पाठेमोक्षोस्तिपापाद्देविविल्विषात्॥५०॥॥कृतीर्थादागतंव्यक्तंसाम्नायंस्वयंस्थितं॥
स्फुरेणस्फुवक्त्रेणप्रयुक्तंब्रह्मराजते॥५१॥मंत्रोहीनःस्वरतोवर्णतोवामिथ्याप्रयुक्तो
नतमर्थमाह॥सवाग्वज्रोयजमानंहिनस्तियथेंद्रशत्रुःस्वरतोपराधात्॥५२॥अक्षरं

हनायुष्यंविस्वरंव्याधिपीडितं॥अक्षताशस्त्ररूपेणवज्रंपततिमस्तके॥५३॥हस्तहीनंतुयोधीते
सस्वरवर्णविवर्जितं॥ऋग्यजुःसामभिर्दग्धोविप्रोनिमधिगछति॥५४॥हस्तेनवेदंयोधीतेस्व
रवर्णार्थसंयुतं॥ऋग्यजुःसामभिःपूतोब्रह्मलोकेमहीयते॥५५॥शोकरःशोकरीशादाद्वा
क्षीपुत्रायधीमते॥वाङ्मयेभ्यःसमाहृत्यदेवीवाचमितिस्थितिः॥५६॥येनाक्षरसमाम्नाये
मधिगम्यमहेश्वरात्॥कृत्स्नंव्याकरणंप्रोक्तंतस्मैपाणिनयेनमः॥५७॥येनधौतागिरःपुंसो
विमलैश्शब्दवारिभिः॥तमश्चाज्ञानजंभिन्नंतस्मैपाणिनयेनमः॥५८॥अज्ञानांधस्यलोक
स्यज्ञानांजनशलाकया॥चक्षुरुन्मीलितंयेनतस्मैपाणिनयेनमः॥५९॥त्रिनयनमभिमुख
निःसृतामिमांयःइहपठेत्प्रयतश्चसदाद्विजः॥सभवतिधनधान्यपशुपुत्रकीर्तिमानतुलं
चसुखंसमश्नुतेदिवीतिदिवीति॥६०॥॥अथशिक्षामात्मोदातश्चत्कारंस्वराणांय

थागीत्यचोस्टदोदात्तंचाषस्लृलृकरएकादश॥ ॥इतिशिक्षासमाप्तः॥ ॥श्रीरस्तु॥हरिः ॐ॥
पंचसंवत्सरमयंयुगाध्यक्षंप्रजापतिं॥दिनर्तुअयनमासांगंप्रणम्यशिरसाशुचिः॥१॥प्रणम्यशि
रसाकालमभिवाद्यसरस्वतीं॥कालज्ञानंप्रवक्ष्यामिलगधस्यमहात्मनः॥२॥ज्योतिषामयनं
कृत्स्नंप्रवक्ष्याम्यनुपूर्वशः॥विप्राणांसंमतंलोकेयज्ञकालार्थसिद्धये॥३॥निरेकंद्वादशाहार्धी
र्द्विहीनंगुणंगतसंज्ञकं॥षष्ट्यापष्ट्यायुतंह्याभ्यांपर्वणांराशिरुच्यते॥४॥स्वरार्कमेकेसोमार्कौ
यदासाकंसवासवौ॥स्यात्तदादियुगंमाघस्तपःशुक्लोदिनंत्यजः॥५॥१॥प्रपद्येतेश्रविष्ठादौसू
र्याचंद्रमसावुदक्॥सार्पार्धेदक्षिणार्कस्तुमाघश्रावणयोःसदा॥६॥घर्मवृद्धिरपांप्रस्रुःक्षपा
ह्रासउदग्गतौ॥दक्षिणेतोविपर्यस्तोषण्मुहूर्त्ययनेनतु॥७॥द्विगुणंसप्तमंचाऽयनाद्यं
त्रयोदश॥चतुर्थेदशमंचैवद्वियुग्माद्यंवडुलेघृतौ॥८॥वस्वस्त्रशाभगोजश्चमित्रःसर्पाभि

नोजलं॥ धातांशाश्चायनाद्यांशार्धपंचनभस्वतः॥ ९॥ भांशास्सूरश्चकाः कार्योःपक्षाद्दादशाहोजु
ताः॥ एकादशगुणस्योनः शुक्लेधैचैदवायदि॥१०॥२॥ कार्याभांशाश्चकास्तानेकलाएकान्नविंश
तिः॥ ऊनस्तानेहिसप्तनीरूपेदूनसंमिताः॥११॥ त्र्यहंशीभशेषोदिवसांशाभागश्चतुर्दशस्या
सुपनीतमिंनं॥ भार्धेधिकेचाधिगतेपरेशेद्वावुत्तमेकंनवकैरवेद्यं॥१२॥ पक्षात्संचदशघ्नो
ध्वंतद्भुक्तमिति निर्दिशेत्॥ नवभिस्तूद्धृतोंशस्यादूनांशद्व्यधिकेनतु॥१३॥जोडशघःखेखेही
शेषाच्चिन्मूषंण्यःसोमाधानः॥ रेमृधाभ्वोजस्तथोदर्यष्ठाइत्यृक्षालिंगैः॥१४॥ जाबाद्यंशैः
समं विद्यात्सूर्यैपार्वसूत्तरे॥ भादानांशाश्चतुर्दशीकाश्चानांदेविनाकलाः॥ १५॥ कलादशा
श्चविंशास्याद्दिमुद्धृतंस्फुनाडिके॥ द्विंशस्तत्कलानांतुषड्भागीन्यधिकंभवेत्॥१६॥ नाडि
केद्दिमुद्धृतंस्फुपेचाषत्यलमाषकं॥ माषकात्कुंभकोद्रोणःकुटपेर्वर्धनेत्रिभिः॥ १७॥ सस

भकुंभयुक्स्योनःसूर्यायोनिंत्रयोदश॥ नवमानिचपंचान्हःकाष्ठाःपंचाक्षरास्मृताः॥१८॥श्रविष्ठा
भ्यांगुणाभ्यस्तान्भाश्विलग्नान्निनिर्दिशेत्॥ सूर्यान्मासान्यकभ्यस्तान्विद्याच्चांद्रमसान्तथा॥१९॥
अतीतपर्वभागेषुशोधयेद्द्विगुणांतिथिं॥ नेष्वंशलभागेषुतिथिनिर्भागतोरविः॥२०॥ धी॥ यां
पर्वभादानकलास्तासूसमगुणांतिथिं॥ प्रक्षिपेत्कलासमूहस्तुविद्यादादानकीःकलाः॥२१॥
यदुत्तरस्यायनतोयनंस्याद्येषंतुयद्दक्षिणतोयनस्य॥ तदेवषष्ट्याद्विगुणंविभक्तंसद्यश्शेस्याद्दिव
समप्रमाणं॥२२॥ तदर्धदिनभागानांसदापर्वणिपर्वणि॥ ऋतुशेषंतुतद्विद्यात्संख्यायसदृपर्व
णां॥२३॥ इत्यपायसमुद्देशोभूयोयेनंप्रकल्पयेत्॥ ज्ञेयराशिगताभ्यस्तान्विभजेज्ज्ञानराशिषु॥
॥२४॥अग्निःप्रजापतिःसोमोरुद्रोदितिर्बृहस्पतिः॥ सर्पाश्चपितरश्चैवभगश्चैवार्यमापिच॥
॥२५॥५॥सवितात्वष्टथवायुश्चेंद्राग्नीमित्रएवच॥ इंद्रोनिर्ऋतिरापोवैविश्वेदेवास्तथैवच॥२६॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

विष्णुर्वसवोवरुणोजएकपात्तथैवच॥अहिर्बुध्न्यःस्तथापूषाश्विनौयमएवच॥२७॥नक्षत्रदेवताए
तास्ताभिर्यज्ञकर्मणि॥यजमानस्यशास्त्रेतैर्नामनक्षत्रजंस्मृतं॥२८॥इत्येतन्मासवर्षाणांमु
ह्तोदयपर्वणां॥दिनर्त्वयनमासांगंव्याख्यातंलगधोब्रवीत्॥२९॥सोमसूर्यस्त्रिचरितोलो
कान्लोकेचसंमितं॥सोमसूर्यस्त्रिचरितोविद्वान्वेदविदश्नुते॥३०॥६॥विषुवंतद्भुणंद्वाभ्यां
रूपहीनंतुषड्गुणं॥यल्लभ्यंतानिपर्वाणितथोर्ध्वंसातिथिर्भवेत्॥३१॥माघशुक्लप्रवृत्तस्तु पो
षकृष्णसमापिनः॥युगस्यपंचवर्षाणिकालज्ञानंप्रचक्षते॥३२॥तृतीयांनवमींचैवपौर्णमा
सींचयोदशीं॥षष्ठीचविषुवांप्रोक्तोद्वादश्यांचसमंभवेत्॥३३॥चतुर्दशीमुपवसथस्तथाभ
वेद्यथोदितोदिनमुपैतिचंद्रमाः॥माघशुक्लाग्निकोयुक्तैःश्रविष्ठायांचवार्षिकी॥३४॥यथा
शिखामयूराणांनागानांमणयोयथा॥तद्वेदांगशास्त्राणांज्योतिषंमूर्धनिस्थितं॥३५॥७॥